श्रीः
श्रीमते रामानुजाय नमः
श्रीमते निगमान्तमहादेशिकाय नमः
श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये उत्तरकाण्डे

# ॥ षड्विंशः सर्गः ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

## श्री रङ्गरामानुज महादेशिकन्

*His Holiness śrīmad āṇḍavan śrīraṅgam*

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

# ॥ षट्त्रिंशः सर्गः ॥

## हनुमन्तं जीवयित्वा ब्रह्मादिदेवैस्तस्मै वरप्रदानं तमादाय वायोरञ्जनागृहे गमनम्, ऋषिशापाद्धनुमतः स्वबलस्य विस्मृतिः, श्रीरामेण स्वयज्ञे समागन्तुं प्रार्थ्यागस्त्यप्रभृतीनां विसर्जनम्

ततः पितामहं दृष्ट्वा वायुः पुत्रवधार्दितः।
शिशुकं तं समादाय उत्तस्थौ धातुरग्रतः॥ **7.36.1** ॥

चलकुण्डलमौलिस्रक् तपनीयविभूषणः।
पादयोर्न्यपतद् वायुस्त्रिरुपस्थाय वेधसे॥ **7.36.2** ॥

तं तु वेदविदा तेन लम्बाभरणशोभिना।
वायुमुत्थाप्य हस्तेन शिशुं तं परिमृष्टवान्॥ **7.36.3** ॥

स्पृष्टमात्रस्ततः सोऽथ सलीलं पद्मजन्मना।
जलसिक्तं यथा सस्यं पुनर्जीवितमाप्तवान्॥ **7.36.4** ॥

प्राणवन्तमिमं दृष्ट्वा प्राणो गन्धवहो मुदा।
चचार सर्वभूतेषु सन्निरुद्धं यथा पुरा॥ **7.36.5** ॥

मरुद्रोधाद् विनिर्मुक्तास्ताः प्रजा मुदिताऽभवन्।
शीतवातविनिर्मुक्ताः पद्मिन्य इव साम्बुजाः॥ **7.36.6** ॥

ततस्त्रियुग्मस्त्रिककुत् त्रिधामा त्रिदशार्चितः।
उवाच देवता ब्रह्मा मारुतप्रियकाम्यया ॥ **7.36.7** ॥

भो महेन्द्राग्निवरुणा महेश्वरधनेश्वराः।
जानतामपि वः सर्वं वक्ष्यामि श्रूयतां हितम् ॥ **7.36.8** ॥

अनेन शिशुना कार्यं कर्तव्यं वो भविष्यति।
तद् ददध्वं वरान् सर्वे मारुतस्यास्य तुष्टये ॥ **7.36.9** ॥

ततः सहस्रनयनः प्रीतियुक्तः शुभाननः।
कुशेशयमयीं मालामुत्क्षेप्येदं वचोऽब्रवीत् ॥ **7.36.10** ॥

मत्करोत्सृष्टवज्रेण हनुरस्य यथा हतः।
नाम्ना वै कपिशार्दूलो भविता हनुमानिति ॥ **7.36.11** ॥

अहमस्य प्रदास्यामि परमं वरमद्भुतम्।
इतः प्रभृति वज्रस्य ममावध्यो भविष्यति ॥ **7.36.12** ॥

मार्तण्डस्त्वब्रवीत् तत्र भगवांस्तिमिरापहः।
तेजसोऽस्य मदीयस्य ददामि शतिकां कलाम् ॥ **7.36.13** ॥

यदा च शास्त्राण्यध्येतुं शक्तिरस्य भविष्यति।
तदास्य शास्त्रं दास्यामि येन वाग्मी भविष्यति।
न चास्य भविता कश्चित् सदृशः शास्त्रदर्शने ॥ **7.36.14** ॥

वरुणश्च वरं प्रादान्नास्य मृत्युर्भविष्यति।
वर्षायुतशतेनापि मत्पाशादुदकादपि ॥ **7.36.15** ॥

यमो दण्डादवध्यत्वमरोगत्वं च दत्तवान्।
वरं ददामि सन्तुष्ट अविषादं च संयुगे ॥ **7.36.16** ॥

गदेयं मामिका नैनं संयुगेषु वधिष्यति।
इत्येवं धनदः प्राह तदा ह्येकाक्षिपिङ्गलः॥ **7.36.17** ॥

मत्तो मदायुधानां च अवध्योऽयं भविष्यति।
इत्येवं शङ्करेणापि दत्तोऽस्य परमो वरः॥ **7.36.18** ॥

विश्वकर्मा च दृष्ट्वेमं बालसूर्योपमं शिशुम्।
शिल्पिनां प्रवरः प्रादाद् वरमस्य महामतिः॥ **7.36.19** ॥

मत्कृतानि च शस्त्राणि यानि दिव्यानि तानि च।
तैरवध्यत्वमापन्नश्चिरजीवी भविष्यति॥ **7.36.20** ॥

दीर्घायुश्च महात्मा च ब्रह्मा तं प्राब्रवीद् वचः।
सर्वेषां ब्रह्मदण्डानामवध्योऽयं भविष्यति॥ **7.36.21** ॥

ततः सुराणां तु वरैर्दृष्ट्वा ह्येनमलङ्कृतम्।
चतुर्मुखस्तुष्टमना वायुमाह जगद्गुरुः॥ **7.36.22** ॥

अमित्राणां भयकरो मित्राणामभयङ्करः।
अजेयो भविता पुत्रस्तव मारुत मारुतिः॥ **7.36.23** ॥

कामरूपः कामचारी कामगः प्लवतां वरः।
भवत्यव्याहतगतिः कीर्तिमांश्च भविष्यति॥ **7.36.24** ॥

रावणोत्सादनार्थानि रामप्रीतिकराणि च।
रोमहर्षकराण्येव कर्ता कर्माणि संयुगे॥ **7.36.25** ॥

एवमुक्त्वा तमामन्त्र्य मारुतं त्वमरैः सह।
यथागतं ययुः सर्वे पितामहपुरोगमाः॥ **7.36.26** ॥

सोऽपि गन्धवहः पुत्रं प्रगृह्य गृहमानयत्।
अञ्जनायास्तमाख्याय वरदत्तं विनिर्गतः॥ **7.36.27** ॥

प्राप्य राम वरानेष वरदानबलान्वितः।
जवेनात्मनि संस्थेन सोऽसौ पूर्ण इवार्णवः॥ **7.36.28** ॥

तरसा पूर्यमाणोऽपि तदा वानरपुङ्गवः।
आश्रमेषु महर्षीणामपराध्यति निर्भयः॥ **7.36.29** ॥

स्रग्भाण्डान्यग्निहोत्राणि वल्कलानां च सञ्चयान्।
भग्नविच्छिन्नविध्वस्तान् संशान्तानां करोत्ययम्॥ **7.36.30** ॥

एवंविधानि कर्माणि प्रावर्तत महाबलः।
सर्वेषां ब्रह्मदण्डानामवध्यः शम्भुना कृतः॥ **7.36.31** ॥

जानन्त ऋषयः सर्वे सहन्ते तस्य शक्तितः।
तथा केसरिणा त्वेष वायुना सोऽञ्जनीसुतः॥ **7.36.32** ॥

प्रतिषिद्धोऽपि मर्यादां लङ्घयत्येव वानरः।
ततो महर्षयः क्रुद्धा भृग्वङ्गिरसवंशजाः॥ **7.36.33** ॥

शेपुरेनं रघुश्रेष्ठ नातिक्रुद्धातिमन्यवः।
बाधसे यत् समाश्रित्य बलमस्मान् प्लवङ्गम॥ **7.36.34** ॥

तद् दीर्घकालं वेत्तासि नास्माकं शापमोहितः।
यदा ते स्मार्यते कीर्तिस्तदा ते वर्धते बलम्॥ **7.36.35** ॥

ततस्तु हततेजौजा महर्षिवचनौजसा।
एषोऽऽश्रमाणि तान्येव मृदुभावं गतोऽचरत्॥ **7.36.36** ॥

अथर्क्षरजसो नाम वालिसुग्रीवयोः पिता।
सर्ववानरराजासीत् तेजसा इव भास्करः॥ **7.36.37** ॥

स तु राज्यं चिरं कृत्वा वानराणां महेश्वरः।
ततस्त्वर्क्षरजा नाम कालधर्मेण योजितः॥ **7.36.38** ॥

तस्मिन्नस्तमिते चाथ मन्त्रिभिर्मन्त्रकोविदैः।
पित्र्ये पदे कृतो वाली सुग्रीवो वालिनः पदे॥ **7.36.39** ॥

सुग्रीवेण समं त्वस्य अद्वैधं छिद्रवर्जितम्।
आबाल्यं सख्यमभवदनिलस्याग्निना यथा॥ **7.36.40** ॥

एष शापवशादेव न वेद बलमात्मनः।
वालिसुग्रीवयोर्वैरं यदा राम समुत्थितम्॥ **7.36.41** ॥

न ह्येष राम सुग्रीवो भ्राम्यमाणोऽपि वालिना।
देव जानाति न ह्येष बलमात्मनि मारुतिः॥ **7.36.42** ॥

ऋषिशापाहतबलस्तदैव कपिसत्तमः।
सिंहः कुञ्जररुद्धो वा आस्थितः सहितो रणे॥ **7.36.43** ॥

पराक्रमोत्साहमतिप्रताप -
सौशील्यमाधुर्यनयानयैश्च।
गाम्भीर्यचातुर्यसुवीर्यधैर्यै -
र्हनूमतः कोऽप्यधिकोऽस्ति लोके॥ **7.36.44** ॥

असौ पुनर्व्याकरणं ग्रहीष्यन्
सूर्योन्मुखः प्रष्टुमनाः कपीन्द्रः।
उद्यद्गिरेरस्तगिरिं जगाम
ग्रन्थं महद्धारयनप्रमेयः॥ **7.36.45** ॥

ससूत्रवृत्त्यर्थपदं महार्थं
ससङ्ग्रहं सिद्ध्यति वै कपीन्द्रः।
नह्यस्य कश्चित् सदृशोऽस्ति शास्त्रे
वैशारदे छन्दगतौ तथैव॥ **7.36.46** ॥

सर्वासु विद्यासु तपोविधाने
    प्रस्पर्धतेऽयं हि गुरुं सुराणाम्।
सोऽयं नवव्याकरणार्थवेत्ता
    ब्रह्मा भविष्यत्यपि ते प्रसादात्॥ **7.36.47**॥

प्रवीविविक्षोरिव सागरस्य
    लोकान् दिधक्षोरिव पावकस्य।
लोकक्षयेष्वेव यथान्तकस्य
    हनूमतः स्थास्यति कः पुरस्तात्॥ **7.36.48**॥

एषेव चान्ये च महाकपीन्द्राः
    सुग्रीवमैन्दद्विविदाः सनीलाः।
सतारतारेयनलाः सरम्भा -
    स्त्वत्कारणाद् राम सुरैर्हि सृष्टाः॥ **7.36.49**॥

गजो गवाक्षो गवयः सुदंष्ट्रो
    मैन्दः प्रभो ज्योतिमुखो नलश्च।
एते च ऋक्षाः सह वानरेन्द्रै -
    स्त्वत्कारणाद् राम सुरैर्हि सृष्टाः॥ **7.36.50**॥

तदेतत् कथितं सर्वं यन्मां त्वं परिपृच्छसि।
हनूमतो बालभावे कर्मैतत् कथितं मया॥ **7.36.51**॥

श्रुत्वागस्त्यस्य कथितं रामः सौमित्रिरेव च।
विस्मयं परमं जग्मुर्वानरा राक्षसैः सह॥ **7.36.52**॥

अगस्त्यस्त्वब्रवीद् रामं सर्वमेतच्छ्रुतं त्वया।
दृष्टः सम्भाषितश्चासि राम गच्छामहे वयम्॥ **7.36.53**॥

श्रुत्वैतद् राघवो वाक्यमगस्त्यस्योग्रतेजसः।
प्राञ्जलिः प्रणतश्चापि महर्षिमिदमब्रवीत्॥ **7.36.54** ॥

अद्य मे देवतास्तुष्टाः पितरः प्रपितामहाः।
युष्माकं दर्शनादेव नित्यं तुष्टाः सबान्धवाः॥ **7.36.55** ॥

विज्ञाप्यं तु ममैतद्धि यद् वदाम्यागतस्पृहः।
तद् भवद्भिर्मम कृते कर्तव्यमनुकम्पया॥ **7.36.56** ॥

पौरजानपदान् स्थाप्य स्वकार्येष्वहमागतः।
क्रतूनहं करिष्यामि प्रभावाद् भवतां सताम्॥ **7.36.57** ॥

सदस्या मम यज्ञेषु भवन्तो नित्यमेव तु।
भविष्यथ महावीर्या ममानुग्रहकाङ्क्षिणः॥ **7.36.58** ॥

अहं युष्मान् समाश्रित्य तपोनिर्धूतकल्मषान्।
अनुगृहीतः पितृभिर्भविष्यामि सुनिर्वृतः॥ **7.36.59** ॥

तदागन्तव्यमनिशं भवद्भिरिह सङ्गतैः।
अगस्त्याद्यास्तु तच्छ्रुत्वा ऋषयः संशितव्रताः॥ **7.36.60** ॥

एवमस्त्विति तं प्रोच्य प्रयातुमुपचक्रमुः।
एवमुक्त्वा गताः सर्वे ऋषयस्ते यथागतम्॥ **7.36.61** ॥

राघवश्च तमेवार्थं चिन्तयामास विस्मितः।
ततोऽस्तं भास्करे याते विसृज्य नृपवानरान्॥ **7.36.62** ॥

सन्ध्यामुपास्य विधिवत् तदा नरवरोत्तमः।
प्रवृत्तायां रजन्यां तु सोऽन्तःपुरचरोऽभवत्॥ **7.36.63** ॥

॥ इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये उत्तरकाण्डे षड्विंशः सर्गः॥